# নৃসিংহস্তোত্রম্

{॥ নৃসিংহস্তোত্রম্ ॥}

শ্রী গণেশায নমঃ ।

ব্রহ্মোবাচ ।

নতোঽস্ম্যনন্তায দুরন্তশক্তযে বিচিত্রবীর্যায পবিত্রকর্মণে ।

বিশ্বস্য সর্গস্থিতিসংযমান্গুণৈঃ স্বলীলযা সন্দধতেঽব্যযাত্মনে ॥ ১॥

শ্রীরুদ্র উবাচ ।

কোপকালো যুগান্তস্তে হতোঽযমসুরোঽল্পকঃ ।

তৎসুতং পাহ্যুপসৃতং ভক্তং তে ভক্তবৎসল ॥ ২॥

ইন্দ্র উবাচ ।

প্রত্যানীতাঃ পরম ভবতা ত্রাযতাং নঃ স্বভাগা

দৈত্যাক্রান্তং হৃদযকমলং ত্বদ্গৃহং প্রত্যবোধি ।

কালগ্রস্তং কিযদিদমহো নাথ শুশ্রূষতাং তে

মুক্তিস্তেষাং ন হি বহুমতা নারসিংহাপরৈঃ কিম্ ॥ ৩॥

ঋষয ঊচুঃ ।

ত্বং নস্তপঃ পরমমাত্থ যদাত্মতেজো যেনেদমাদিপুরুষাত্মগতং সসর্জ ।

তদ্বিপ্রলুপ্তমমুনাদ্য শরণ্যপাল রক্ষাগৃহীতবপুষা পুনরন্বমংস্থাঃ ॥ ৪॥

Stotram Digitalized By Sanskritdocuments.org

পিতর ঊচুঃ ।

শ্রাদ্ধানি নোঽধিবুভুজে প্রসভং তনূজৈর্দত্তানি তীর্থসময়েঽপ্যপিবত্তিলাম্বু ।

তস্যোদরান্নখবিদীর্ণবপাদ্য আর্চ্ছত্তস্মৈ নমো নৃহরয়েঽখিল ধর্মগোপ্ত্রে ॥ ৫॥

সিদ্ধা ঊচুঃ ।

যো নো গতিং যোগসিদ্ধামসাধুরহারষীদ্যোগতপোবলেন ।

নানাদর্পং তং নখৈর্নির্দদার তস্মৈ তুভ্যং প্রণতাঃ স্মো নৃসিংহ ॥ ৬॥

বিদ্যাধরা ঊচুঃ ।

বিদ্যাং পৃথগ্ধারণযাঽনুরাদ্ধাং ন্যষেধদজ্ঞো বলবীর্যদৃপ্তঃ ।

স যেন সংখ্যে পশুবদ্ধতস্তং মাযানৃসিংহং প্রণতাঃ স্ম নিত্যম্ ॥ ৭॥

নাগা ঊচুঃ ।

যেন পাপেন রত্নানি স্ত্রীরত্নানি হৃতানি নঃ ।

তদ্বক্ষঃপাটনেনাসাং দত্তানন্দ নমোঽস্তু তে ॥ ৮॥

মনব ঊচুঃ ।

মনবো বযং তব নিদেশকারিণো দিতিজেন দেব পরিভূতসেতবঃ ।

ভবতা খলঃ স উপসংহৃতঃ প্রভো করবাম তে কিমনুশাধি কিঙ্করান্ ॥ ৯॥

প্রজাপতয ঊচুঃ ।

প্রজেশা বযং তে পরেশাভিসৃষ্টা ন যেন প্রজা বৈ সৃজামো নিষিদ্ধাঃ ।

স এষ ত্বযা ভিন্নবক্ষানুশেতে জগন্মঙ্গলং সত্ত্বমূর্তেঽবহারঃ ॥ ১০॥

গন্ধর্বা ঊচুঃ ।

বযং বিভো তে নটনাট্যগাযকা যেনাত্মসাদ্বীর্যবলৌজসা কৃতাঃ ।

স এষ নীতো ভবতা দশামিমাং কিমুৎপথস্থঃ কুশলায কল্পতে ॥ ১১॥

চারণা ঊচুঃ ।

হরে তবাংঘ্রিপঙ্কজং ভবাপবর্গমাশ্রিতাঃ ।

যদেব সাধু হৃচ্ছযস্ত্বযাঽসুরঃ সমাপিতঃ ॥ ১২॥

যক্ষা ঊচুঃ ।

বযমনুচরমুখ্যাঃ কর্মভিস্তে মনোজ্ঞৈস্ত ইহ দিতিসুতেন প্রাপিতা বাহকত্বম্ ।

স তু জনপরিতাপং তৎকৃতং জানতা তে নরহর উপনীতঃ পঞ্চতাং পঞ্চবিংশঃ ॥ ১৩॥

কিম্পুরুষা ঊচুঃ ।

বযং কিম্পুরুষাস্ত্বং তু মহাপুরুষ ঈশ্বর ।

অযং কুপুরুষো নষ্টো ধিক্কৃতঃ সাধুভির্যদা ॥ ১৪॥

বৈতালিকা ঊচুঃ ।

সভাসু সত্রেষু তবামলং যশো গীত্বা সপর্যাং মহতীং লভামহে ।

যস্তাং ব্যনৈষীদ্ভৃশমেষ দুর্জনো দিষ্ট্যা হতস্তে ভগবন্যথামযঃ ॥ ১৫॥

কিন্নরা ঊচুঃ ।

বযমীশ কিন্নরগণাস্তবানুগা দিতিজেন বিষ্টিমমুনাঽনুকারিতাঃ ।

ভবতা হরে স বৃজিনোঽবসাদিতো নরসিংহ নাথ বিভবায নো ভব ॥ ১৬॥

বিষ্ণুপার্ষদা ঊচুঃ ।

অদ্যৈতদ্ধরিনররূপমদ্ভুতং তে দৃষ্টং নঃ শরণদ সর্বলোকশর্ম ।

সোঽযং তে বিধিকর ঈশ বিপ্রশপ্তস্তস্যেদং নিধনমনুগ্রহায বিদ্মঃ ॥ ১৭॥

॥ ইতি শ্রীমদ্ভাগবতান্তর্গতে সপ্তমস্কন্ধেঽষ্টমধ্যাযে নৃসিংহস্তোত্রং সম্পূর্ণম্ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Narasimha Stotram ( From Bhagavata Puranam ) Lyrics in Bengali PDF
% File name : nrisinhastotra.itx
% Location : doc_vishhnu
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com.com
% Description-comments : bhAgavatAntargate_saptamaskandhe
% Latest update : December 25, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%

% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website